कक्षा–आचार्य प्रथमवर्ष

तृतीयपत्रम् व्याकरण

विषयः व्याकरण

प्रेषकः

प्रो. भारतभूषण त्रिपाठी

राष्ट्रियसंस्कृतसंस्थानम्

लखनऊपरिसरः, लखनऊ

प्र०· असिद्धं बहिरङ्गमन्तरङ्गे' इत्यत्र अङ्ग शब्दस्य कोऽर्थः

उ० निमित्तम्

प्र० अर्थकृत बहिरङ्गत्वम् गृह्यते न वा

उ० न तिसृचतसृ' निषेध सामर्थ्यादर्थकृत बहिरङ्ग-त्वम् नाश्रीयते।

प्र० समकालप्राप्त बहिरङ्गस्य, जात बहिरङ्गस्य चै-केकमुदाहरणम् लेखनीयम्।

उ० समकालप्राप्त बहिरङ्गस्योदाहरणम् वृश्चति जात बहिरङ्गस्योदाहरणम् पचावेदम्

प्र० नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः, अस्याः परिभाषया अवतरणं व्याख्येयम

उ० अक्षद्युरित्यत्र अन्तरङ्गयण्प्रति जात-बहिरङ्गस्योठस्यासिद्धत्वाद् यणादेशो न प्राप्नोति यण् स्यात् तदर्थं परिभाषा कार्या।

प्र० नाजानन्तर्ये ... अस्याः परिभाषायाः ज्ञापकम् किम्

उ० षत्वतुकोरसिद्धः इति सूत्रस्थ तुग्ग्रहणमस्याः परिभाषायाः ज्ञापकम्।

प्र० नाजानन्तर्ये परिभाषाया अर्थः लेख्यः

उ० अजिनकं - अन्यानन्तर्यनिमित्तक अन्तरङ्गकार्ये कर्तव्ये जातबहिरङ्गाप्रयुक्तासिद्धत्वन्नभवति ।

प्र० 'गोमत्प्रिय' इत्यं वरणं कस्याः परिभाषायाः ज्ञापकम् ?

उ० अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाध्यते ।

प्र० अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाध्यते, अस्याः परिभाषायाः ज्ञापकम् किम्

उ० प्रत्ययोत्तरपदयोश्च इति सूत्रं ज्ञापकम् ।